STOTRADHWANI

# 8 - अष्टम दशकम्

## प्रळय वर्णनम्, जगत् सृष्टि प्रकार वर्णनम् च

एवं तावत् प्राकृत प्रक्षयान्ते
ब्राह्मे कल्पे ह्यादिमे लब्ध जन्मा ।
ब्रह्मा भूयस् त्वत्त एवाप्य वेदान्
सृष्टिं चक्रे पूर्व कल्पोप मानाम् ॥ ॥8-1॥

सोऽयं चतुर्युग सहस्र मिता न्यहानि
तावन् मिताश्च रजनीर् बहुशो निनाय ।
निद्रात् यसौ त्वयि निलीय समं स्वसृष्टैः
नैमित्तिक प्रलय माहुरतोऽस्य रात्रिम् ॥ ॥8-2॥

अस्मादृशां पुनरहर् मुख कृत्य तुल्यां
सृष्टिं करो त्यनुदिनं स भवत् प्रसादात् ।
प्राग्ब्रह्म कल्प जनुषां च परायुषां तु
सुप्त प्रबोधन समास्ति तदाऽपि सृष्टिः ॥ ॥8-3॥

पञ्चाश दब्द मधुना स्ववयोर्ध रूपम्
एकं परार्ध मतिवृत्य हि वर्तते ऽसौ ।
तत्रान्त्य रात्रि जनितान् कथयामि भूमन्
पश्चात् दिनावतरणे च भवत् विलासान् ॥ ॥8-4॥

दिनावसानेऽथ सरोज योनि: सुषुप्ति कामस् त्वयि सन्निलिल्ये ।
जगन्ति च त्वज्जठरं समीयु: तदेद मेकार्णव मास विश्वम् ॥ ॥8-5॥

तवैव वेषे फणिराजि शेषे जलैक शेषे भुवने स्म शेषे ।
आनन्द सान्द्रानुभव स्वरूप: स्वयोग निद्रा परिमुद्रितात्मा ॥ ॥8-6॥

कालाख्य शक्तिं प्रलयावसाने प्रबोधये त्यादिशता किलादौ ।
त्वया प्रसुप्तं परिसुप्त शक्ति व्रजेन तत्राखिल जीव धाम्ना ॥ ॥8-7॥

चतुर्युगाणां च सहस्र मेवं त्वयि प्रसुप्ते पुन रद्वितीये ।
कालाख्य शक्ति: प्रथम प्रबुद्धा प्रबोधयत् त्वां किल विश्वनाथ॥8-8॥

विबुध्य च त्वं जलगर्भ शायिन् विलोक्य लोका नखिलान् प्रलीनान् ।
तेष्वेव सूक्ष्मात्म तया निजान्त: स्थितेषु विश्वेषु ददाथ दृष्टिम् ॥8-9॥

ततस् त्वदीया दयि नाभि रन्ध्रात् उदञ्चितं किंचन दिव्य पद्मम् ।
निलीन निश्शेष पदार्थ माला संक्षेप रूपं मुकुलायमानम् ॥ ॥8-10॥

तदेत दंभोरुह कुड्मलं ते कलेवरात् तोयपथे प्ररूढम् ।
बहिर्निरीतं परितस् स्फुरद्भि: स्वधामभिर् ध्वान्तमलं न्यकृन्तत्॥ ॥8-11॥

संफुल्ल पत्रे नितरां विचित्रे तस्मिन् भवद्वीर्य धृते सरोजे ।
स पद्मजन्मा विधि राविरासीत् स्वयं प्रबुद्धाखिल वेदराशि: ॥8-12॥

अस्मिन् परात्मन् ननु पाद्म कल्पे त्व मित्थ मुत्थापित पद्म योनि:।
अनन्त भूमा मम रोग राशिं निरुन्धि वातालय वास विष्णो ॥॥8-13॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥